श्रीहरिरायप्रणीतं टिप्पणम् ।

तद्भावभावनेन च तद्रूपत्वमिति भावः। वस्तुतो भावात्मा भगवान्, 'रसो वै सः' इति श्रुतेः। तदात्मरूपत्वादेतेऽपि तथा। तथा श्रीयमुनाऽपि द्रवीभूतरसात्मकतत्स्वरूपत्वेन। तत्र यथा भगवतीव श्रीयमुनायामपि स्वामिनीभावेन स्त्रीरूपत्वं, तेन च तत्र सर्वाऽपि भगवल्लीला, भगवद्भावेन च भगवत्त्वं, विरहे भगवत्स्वरूपतद्दर्शनेन स्वामिनीसुखाय, तथाऽत्राऽपि प्राकट्यदशायां स्वामिनीभावेन सेवादिकृतौ तद्रूपत्वं, भगवद्भावेन भगवद्रूपत्वं, विरहे तासामन्तरास्यप्राकट्येन[1] स्वरूपसम्बन्धिसुखदानायेति बोध्यम्। अत एवोक्तं श्रीवल्लभाष्टके—" यस्मादानन्ददं श्रीव्रजजननिचय' इति । यद्वा। आविर्भूतं स्वस्वहृदयेभ्यो बहिःप्रकटीभूतं यद्वृन्दावनं तत्प्रियं यासाम् । अन्तःस्थितावपि बहिःप्राकट्यस्यैवाऽभिलषितत्वात्। अत एव 'वृन्दावनं सखि भुवो वितनोति कीर्तिम्' (१०-२१-१०)इति ताभिर्गीतम्।तथाच तादृक्तद्रूपत्वादस्मत्प्रभवोऽपि लीलाविष्करणाभिलाषिण इति ज्ञेयम् । तातचरणा इति सम्बन्धनिरूपणं तु पुष्टिमार्गीयाचार्यकरुणासिद्धिर्यथाकथञ्चित्सम्बन्धसिद्ध्यैव भवति न त्वन्यसाधनैरिति बोधनाय ।

देहेन भावतो वाऽपि सम्बन्धः फलसाधकः ।
पुष्टिमार्गे नाऽतिरिक्तं साधनं साधकं ततः ॥ १ ॥
नाऽथमात्मेत्युपनिषन्निषेधाति यतोऽखिलम् ।
नन्दादयो देहजेन प्रादुर्भावेन गोपिकाः ॥ २ ॥

मयीति तत्कृपायोग्यत्वबोधनाय । सर्वसाधनराहित्येन केवलं तदीयत्वाद् अत एवैकवचनम्, अत एव सप्तश्लोक्यां 'तनोतु निजदासस्य सौभाग्यम्' इति

श्रीपुरुषोत्तम प्रणीता विवृतिः ।

'पररूपं तकारो लचटवर्गेषु'—तकारः पदान्तो लचटवर्गेषु परे पररूपमापद्यते— इति कौमारसूत्रात्। आवश्यकत्वमपि विवृतेरेतेनैव ध्वनितम्। आविर्भूतवृन्दावनप्रिया इति। अत्र वृन्दावनस्य प्रियः, वृन्दावनं प्रियं यस्येति वा वृन्दावनप्रियः, आविर्भूतश्चाऽसौ स च आविर्भूतवृन्दावनप्रिय इति तत्पुरुषबहुव्रीह्यन्यतरगर्भः कर्मधारयः । तथाच तदभिन्ना इत्यर्थः । अत्र भगवत्पक्षे अभेदो वास्तवः । 'वस्तुतः कृष्ण एवे'त्याद्युक्तेः । व्रजभक्तपक्षे तद्भाववत्त्वकृतसारूप्यनिबन्धनः । 'तत्सारभूते'ति नामनिर्देशात् । तातचरणा इत्यत्र चरणपदं बहुवचनं च पूजार्थम् । 'जीवत्सु तातपादेषु' 'मुद्रे ब्रूहि सलक्ष्मणाः कुशलिनः श्रीरामपादा' इत्यादिप्रयोगदर्शनात्, 'एकत्वं न प्रयुञ्जीत गुरावात्मनि चेश्वरे' इति वाक्याच्च 'जात्या-

१ तासामन्तरा स्वप्राकट्येनेति ग. २ तादृग्रूपत्वादिति ग-व. ३ तन्मयत्वादिति ग-व.

विविधलीलोपयोगिनीं कालिन्दीं स्तोतुकामाः श्रीगोकुलेशे यथा जीवैर्नमनातिरिक्तं न कर्त्तुं शक्यं, तथा कालिन्द्यामपीत्याशयेनाऽऽदौ नमनमे-

श्रीहरिरायप्रणीतं टिप्पणम् ।

प्रार्थना । विठ्ठल इति नामग्रहणं नाम्नाऽपि तद्योग्यताद्योतनाय । ज्ञानशून्यानुग्राहकत्वं हि नामार्थः । तस्य चाऽऽचार्यकरुणामन्तरेणासिद्धेस्तत्कृपयैव सामर्थ्यरूपया तादृशजनानुग्राहकत्वसिद्धिः । तदर्थमाचार्यवर्याणामेव प्रभुणाऽऽविर्भावितत्वात् । अस्मिन्मार्गे कृपैव साधनं फलं चेति बोधनाय कृपयन्त्वित्यभिहितम् । इदं साधनफलरूपत्वञ्च ‘ कृपायुक्तस्य तु यथा सिद्ध्येदि’ति ‘कृपानन्दः सुदुर्लभ’ इति निबन्धनिरोधलक्षणग्रन्थीयवाक्याभ्यामवमन्तव्यम् । एवमेकेन पद्येन प्रभुभिः स्वाभीष्टप्रार्थनाप्रसङ्गेन निजाचार्यस्वरूपं निरूपितम् ।

विविधलीलोपयोगिनीमिति । आचार्यचरणानां हि प्रभुलीलासम्बन्धोऽभिलषितः । अत एवाऽग्रे तनुनवत्वप्रार्थनम् । स च तादृक्तत्सम्बन्धिपरितोषणेन भवति । तच्च यथास्थितरूपनिरूपणेन स्तुत्येति श्रीयमुनाया लीलासम्बन्धित्वबोधनाय विविधलीलोपयोगिनीमित्युक्तम् । विविधाः स्वरूपगुणभेदेन सर्वात्मभावकामभावादिभेदेन[1] शास्त्रीयाशास्त्रीयप्रकाराभ्यां नानाप्रकारा या भगवतः स्वामिनीभिः सह लीलास्तासु अलौकिकशरीरसम्पादकत्वेन प्रभुसम्बन्धसम्पादनेन भावजनकत्वादिभिश्च तथेत्यर्थः । कालिन्दीमिति । यद्यपि यमुनामिति वाच्यं तद्भिन्नत्वादस्याः, तथापि कालिन्दीमूलरूपत्वं तस्यां[2] बोधयितुं भगवति ‘ देवकीजठरभूरि’तिवाक्यात् ‘ देवकीसुतपदाम्बुजे’ तिवाक्याच्च देवकीसुतत्वोक्तिवदत्राऽपि कालिन्दीत्वोक्तिरितिवेद्यम् । किञ्च । प्रभुसम्बन्धप्रतिबन्धकदोषनि-

श्रीपुरुषोत्तमप्रणीता विवृतिः ।

ख्यायामेकस्मिन्बहुवचनमन्यतरस्यामि’ति सूत्रे ‘जात्याख्यायामि’ति योगं विभज्य पूजायामेकत्वे बहुवचनं प्रयुक्तमित्यदोषः । एवं कृपाप्रार्थनयाऽऽर्थिकनमनात्मकं मङ्गलं विधाय विवक्षितोद्धारस्य भजनानन्दावाप्तिरूपत्वात्तत्र च भक्तिमत्कृतस्य दैन्यस्यैव साधनत्वात्तद्धृदि कृत्वा भक्तिस्तत्प्रतिबन्धनिवृत्तिः तत्तदुपयोगिपरिकरसम्पत्तिश्चाऽर्थज्ञानपूर्वकाष्टकपाठेन भविष्यतीति ज्ञापनाय स्तोतव्यायाः श्रीकालिन्द्याः स्वरूपमुपकारकत्वं कृपावत्त्वं च बोधयन्त एवाऽऽद्यश्लोकमवतारयन्ति विविधेत्यादि । अत्र विविधलीलोपयोगिनीमित्यनेन हेतुगर्भेण विशेषणेन स्तुतिप्रयोजकं

१ भेदेन चेति ख. २ अस्यामिति ख.